# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-१ (SEM-2) | **प्रश्नपत्रम् – ७** | गुणाः - ७० |
| विषयः – साहित्यम् | 010904 | समयः - ११ तः २ |
| दिनाङ्कः - २५/४/२०१६ | सन्दर्भग्रन्थः – साहित्यदर्पणम् (तृतीय परिच्छेद, १ तः २६७ कारिका | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **द्वयोः ससन्दर्भं व्याख्या कार्या** | ०८ |
| | (१) लोकोत्तर चमत्कार प्राणः कैश्चित् प्रमातृभिः ।<br>स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥<br>(२) शूरता दक्षता सत्यं महोत्साहोऽनुरागिता ।<br>नीचे घृणादिके स्पर्धा यतः शोभेति तां विदुः॥<br>(३) प्रियः कृत्वापि संकेतं यस्या नायाति सन्निधिम् ।<br>विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता ॥ | |
| **प्रश्नः -२** | विभावादीनां अलौकिकत्वम् कथं भवति ? इति विवेचनं कुरुत ।<br>अथवा<br>नायकस्य भेदान् सम्यक् विवेचयतु । | ०८ |
| **प्रश्नः -३** | **टिप्पणीद्वयं लेख्यम् ।** | ०४ |
| | (१) प्रपाणक रस-न्याय ।<br>(२) अनुकार्यगतो रसः ।<br>(३) दूतभेदाः ।<br>(४) निर्विकल्पक-सविकल्पकयोः ज्ञानम् । | |
| **प्रश्नः - ४** | **पञ्चप्रश्नानां उत्तराणि देयः ।** | ०५ |
| | (१) --------भूषणं न तु दूषणम् । पूर्तिं कुरुत ।<br>(२) आस्वादन शब्दस्य कोऽर्थः ?<br>(३) विभाव शब्दस्य कोऽर्थः ?<br>(४) नायकस्यार्थ चिन्तने कः सहायः ?<br>(५) मध्यानायिकायाः कति भेदाः सन्ति ?<br>(६) `शोणं वीक्ष्य मुखम्' इति कस्योदाहरणम् ?<br>(७) नायिकायाः अङ्गजाः के अलङ्काराः सन्ति ? | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः -५** | **द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) तद्भावभाविते चित्ते वल्लभस्य कथादिषु ।<br>मोट्टायितमिति प्राहुः कर्णकण्डूयनादिकम् ॥<br>(२) मोहो विचित्तताभीतिदुःखावेगानुचिन्तनैः ।<br>मूर्च्छनाज्ञानपतनभ्रमणादर्शनादिकृत् ॥ | |

| | | |
|---|---|---|
| | (३) उपायाभावजन्मा तु विषादः सत्त्व संक्षयः ।<br>निःश्वासोच्छ्वासहृत्ताप सहायान्वेषणादिकृत् ॥ | |
| प्रश्नः -६ | के व्यभिचारिणः ? इति विलिख्य विवेचनं कुरु ?<br>अथवा<br>नायिकायाः अलङ्कारान् वर्णयतु । | ०८ |
| **प्रश्नः -७** | **एका टिप्पणी लेख्या ।** | ०२ |
| | (१) हसितम् , (२) सत्विकाः | |
| **प्रश्नः -८** | **एकैक वाक्येन द्वयोः उत्तरं ददातु ।** | ०२ |
| | (१) अनुभाव शब्दस्य कोऽर्थः ?<br>(२) निर्वेदः किमिति ?<br>(३) का नाम जडता ? | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -९** | **द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) न चातिशोभते यन्नापैति प्रेममनोगतम् ।<br>तन्नीलीरागमाख्यातं यथा श्रीरामसीतयोः ॥<br>(२) कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः ।<br>अनित्यत्वा दिनाऽशेषवस्तु निःसारता तु या ॥<br>(३) शान्ते च हीननिष्ठे, गुर्वाद्यालम्बते हास्ये ।<br>ब्रह्मवधादुत्साहेऽधमपात्रगते तथा वीरे ॥ | |
| प्रश्नः -१० | ग्रन्थानुसारेण विप्रलम्भ शृङ्गारस्य वर्णनं सोदाहरणं कुरुत ।<br>अथवा<br>साहित्यदर्पणानुसारेन रसानां भिन्नत्वं वर्णयतु । | ०८ |
| **प्रश्नः -११** | **टिप्पणीद्वयं लेख्यम् ।** | ०४ |
| | (१) सम्भोग शृङ्गारः<br>(२) हास्यः<br>(३) अद्‌भुतरसः<br>(४) शान्तरसः | |
| **प्रश्नः -१२** | **अधोलिखितपञ्चप्रश्नानाम् एकैकवाक्यद्वारा उत्तराणि देयः ।** | ०५ |
| | (१) नाट्यशास्त्रस्य रचयिता कः ?<br>(२) कति रसाः सन्ति ?<br>(३) कति स्थायिभावः सन्ति ?<br>(४) "निःशेषच्युतस्तनतटम्" कस्योदाहरणम् ?<br>(५) करुणरसस्य कः स्थायिभावः ?<br>(६) साहित्यदर्पणस्य तृतीयपरिच्छेदे कति कारिकाः सन्ति ?<br>(७) रस निष्पत्तिः कथं भवति ? | |

***